मयशास्त्रम्। *

प्रथमोऽध्यायः।

नवतालम्।

प्रतिमा स्यात् द्विभागैकं तद्भागं पुनरेवच।
शेषभागं द्विभागं च तथा शेषं त्रिभागकम्॥ १॥
तदेवाष्टांगुलादयन्तं तदर्धं मस्तकायतम्।
केचित्तदुचुः केशाग्रं तन्मध्ये वेदभागिकम्॥
ग्रीवामानं यथा प्रोक्तं नवतालेन चोत्तमम्॥ २॥
उत्तमे नवताले तु मस्तकं चतुरंगुलम्।
मुखं द्वादशमानेन स्याद्ग्रीवाचतुरंगुला॥ ३॥
आग्रीवस्तनमध्यं वै द्वादशांगुलमायतम्।
स्तनान्तरादि नाभ्यन्तं तावदायतमुच्यते।
आनाभिमेढ़ नान्तं च तावदेवायतं भवेत्॥ ४॥
आजानुगुल्भपर्य्यन्तं चतुर्विंशतिमानकम्।
जंघयोरुस्समानस्तु गुल्फश्च चतुरंगुलम्।
उच्यते नवतालेऽस्मिन्नष्टोत्तरशतांगुलम्॥ ५॥
द्वादशांगुलमानेन पादायति रुदाहृता।
अंगुलीतु समाख्याता चतुरंगुलमायता॥ ६॥
नवताले तु यत्प्रोक्तं प्रथमं द्वादशांगुलम्।
केशान्तादि भ्रुवोर्मध्यं तत्र स्याच्चतुरंगुलम्।
नासिका तावती ज्ञेया तदादिचुबुकं तथा॥ ७॥
नेत्रे द्व्यंगुलविस्तीर्णे चतुरंगुलमायते।
कर्णौ च तावदायामौ तावदंगुलविस्तृतौ॥ ८॥
कर्णयोरन्तरं प्रोक्तं द्वादशांगुलविस्तृतम्।
कर्णमूलादिनासान्तमष्टांगुलमितीर्य्यते।
नासाद्व्यंगुलि विस्तारा ग्रीवाष्टांगुलविस्तृता॥ ९॥

---

* From *Mayavastu with Telugu notes*, Published by V. Rama Swamy Sastrulu & Sons, Madras (1916)

भुजान्तरस्य विस्तारश्चतुर्विंशति मानतः ।
द्वादशांगुलविस्तीर्णं स्तनमध्यमिहोच्यते ॥ १० ॥
नाभेरुपरिदेशस्तु द्वादशांगुलविस्तृतः ।
कढिदेशश्चतुर्विंशत्यंगुलं विपुलो भवेत् ॥ ११ ॥
द्वादशांगुलविस्तार उरु र्जान्वष्ठविश्रुतम् ।
जंघाया विस्तृति स्तावत्तदर्धं गुल्भमूलके ॥ १२ ॥
पादांगुलीनां विस्तार स्यात् षड़ंगुलमानतः ॥ १३ ॥
ग्रीवातसस्कन्धदेशस्तु विशामोऽष्टांगुलो भवेत् ।
स्कन्धाद्यत्कूर्परान्तं तच्चतुर्विंशतिरंगुलम् ।
कूर्परान्मणिवन्धान्तमायामोष्टादशांगुलम् ।
मणिवन्धात्सांगुलीकं हस्तस्याद्द्वादशायतः ॥ १४ ॥
विपुलं भुजमूलंतु स्यात् षड़ंगुलमानतः ।
कूर्परस्य तु विस्तारं पंचांगुलमुदीरितम् ।
मणिवन्धस्य वैपुल्यं चतुरंगुलमुच्यते ।
विस्तृतांगुलि हस्तस्य विस्तारं स्यात् षड़ंगुलम् ॥ १५ ॥

स्त्रीविग्रहप्रमाणम् ।

केशान्तान्तं त्रिभागं स्यान्मुखं द्वादशमात्रकम् ।
ग्रीवा त्रिमात्रका प्रोक्ता स्तनोर्द्धं नाभिगुह्ययोः ।
उर्द्धं चैव समाख्यातामेकैकं द्वादशांगुलम् ।
चतुर्विंशतिमात्रन्तु जंघायतमुदीर्य्यते ।
जंघोरुतुल्यभागं स्यात् त्रिमात्रं गुल्फमानकम् ।
स्त्रीप्रमाणमिदं ख्यातं निर्म्मितं विश्वकर्मणा ॥ १६ ॥
चरणं त्वेकभागं स्यात् षट्भागा जंघिका भवेत् ।
जंघोर्वोस्तुल्यभाग स्यान्मध्यं यन्नाभिगुह्ययोः ।
स्तननाभ्यन्तरं चैव स्तनग्रीवान्तरं तथा ।
एकैकं तु त्रिभागं स्यादेकभागो गलो मतः ।
मुखं त्रिभागं केशान्तमेकांशं नवतालकम् ।
इत्यते प्रथमोत्सेधभागास्त्वष्ट्रा विनिर्मितः ॥ १७ ॥
अंगुष्ठकाग्रं स्तनचूचुकान्तम्
देवस्य भक्ताभयदस्यहस्ते ।

नेत्रान्ततुल्यं जलजं च चक्रम्
मध्ये कटिस्थं वरहस्तमाहुः ॥ १८ ॥
यद् विग्रहो यद् परिमाणकः स्यात्
तद् विग्रहार्धायितमस्य पीठम् ।
मुखप्रमाणं द्विगुणप्रमाणम्
किरीटमुच्चैः परिकल्पयन्ति ॥ १६ ॥
देवस्य कर्णान्तसमप्रमाणाम्
देवीमनुत्वष्ट्रमुखा वदन्ति ।
देव्यास्तु दृष्टि स्तनमध्यदेशा
जानूपरिस्थानगता मनोज्ञा ।
व्यत्यस्तपादाब्ज मनोहराया
व्यत्यस्तमानं तु षड़ांगुलं स्यात् ॥ २० ॥
मानसारन्तु गार्गेयं दीतं मारीचमत्रियम् ।
सर्वशास्त्रानुसारं च सारं मयमतागमः ॥ २१ ॥
मृत्तिकावृत्तपाषाणमोहद्रव्यं सनातनम् ।
कर्त्तव्यं सकलं वेरं तन्मानमधुनोच्यते ॥ २२ ॥
हर्म्यगर्भगृहस्तम्भद्वारहस्तांगुलं तु षट् ॥ २३ ॥
वेरमानैस्ततः पश्चान्मूलवेरं यथाक्रमम् ॥ २४ ॥
त्रिचतुः पञ्चभागे तु प्रासादविपुले तथा ।
शेषांशो ह्युत्तमोमध्यः कनीयान् प्रतिमोदयः ॥ २५ ॥
गर्भार्द्धे पंचभागे तु द्विभागं द्वित्रिभागिकम् ।
अधमं मध्यमं श्रेष्ठं प्रत्येकं च त्रिधामतम् ।
नवभेदे समाख्याते कनिष्ठादि त्रयं भवेत् ॥ २६ ॥
स्तम्भोत्सेधसमं हीनं पादाधिक्ये तु मध्यमम् ।
सार्धस्तम्भोत्तमः प्रोक्तो वेरायाममिति स्मृतम् ॥ २७ ॥
वेरस्यमानं त्रिगुणैकगर्भम्
गर्भत्रिभागं परभित्तिमानम् ।
वेराद्यपीठंच तदर्धगोमुखम्
वेरस्वरूपं नरहर्म्यमाणम् ॥ २८ ॥

लिंगस्य तारत्रिगुणैकपीठम्
पीठस्य तारत्रयगर्भमानम् ।
गर्भत्रिभागं भित्तिकभित्ति
लिंगस्य रूपं प्रासादमानम् ॥ २६ ॥
चतुरस्रं क्षेत्रविस्तारं पंचभागं विधीयते ।
भागभागं भवेत् भित्ति भागे भागे भवान्तिका ।
तन्मध्ये पीठिकायामं यावद् द्वारादि विस्तरम् ।
विस्ताराद्द्विगुणोत्सेधं द्वारमानं विधीयते ।
पीठिकायामामुत्सेधं त्रियायामद्वारविस्तारम् ।
विस्तारद्द्विगुणोत्सेधमेतत् द्वारस्य लक्षणम् ।
हर्म्यैत्वर्धं महानसं हर्म्यद्विगुणलक्षणम् ।
मण्टपार्धभवेत् भद्रं भद्रस्य समनन्दिकम् ।
नन्दिकार्धं भवेत् द्वारं द्वाराद्द्विगुणगोपुरम् ।
गोपुरद्द्विगुणव्यासं प्राकारं परिवेष्टितम् ॥ ३० ॥
स्तम्भोच्छ्रयं तु नन्द्यष्टभागैर्हीनास्तु द्वारयः ।
तदेतद्द्वारमानन्तु द्विमुखं समुदीरितम् ॥ ३१ ॥
त्र्यर्धं पंचार्धं च पंचहस्तेभ्यो पंचहस्तकैः ॥ ३२ ॥
पंचस्युः पंचारत्निभ्य स्सप्तभयो नवके तथा ॥ ३३ ॥
श्रेष्ठं मध्यं कनिष्ठंच त्रिविधं प्रतिमाधनम् ॥ ३४ ॥

द्वितीयोऽध्यायः

क्षुद्रप्रतिमा ।

सैकत्रिंशांगुला दूर्ध्वं षड्ंगुलविवर्धनात् ।
सप्ताधिकांगुल नवहस्तान्तं प्रतिमोदयः ॥ १ ॥
पंचारत्निप्रमाणोर्द्ध्वं द्वादशांशमनुक्रमात् ।
त्रयस्त्रिंशत्समुत्सेधमानं प्राज्ञै र्निरुपितम् ॥ २ ॥
सप्तपद्पंचभागे तु मूलबेरायतांशके ।
जंगमप्रतिमानां तु दशमानं प्रचक्षते ॥ ३ ॥
त्रित्रिपंचांगुलाद्यन्तं यावत् बेरं गृहेष्वणु ।

अर्धार्धांगुल वृद्धंच पंचपंचप्रमाणकम् ॥ ४ ॥
यजमानांगुलेनापि गृह्णीयाद्वा यथेप्सितम् ।
क्षुद्रानां तु यवैरेव व्यासायामादि कल्पयेत् ॥ ५ ॥
सकलाकुलमिश्राणां मानमानांगुलोन्नतम् ॥ ६ ॥
यजमानसमुत्सेधं श्रेष्ठमष्टांशहीनकम् ।
अधमन्तु दशांशोनं मध्यमं वेरमुच्यते ॥ ७ ॥
रुपिनीरुपकर्त्तातु कर्त्तव्या स्याद्विनिश्चयः ।
अथवा वाहुसीमान्तं स्तनान्तं नाभिसीमकम् ।
श्रेष्ठं मध्यं कणिष्ठं च कुब्जं वामनकं त्यजेत् ॥ ८ ॥
शिल्पप्रमाणं कर्त्यं सर्वथा तु विधीयते ॥ ६ ॥
धामगर्भगृहस्तम्भद्वारमुक्तं यथाविधि ।
लब्धोच्चं भानमात्रैस्तु बुद्धिमान् विभजेत् समम् ॥ १० ॥
परमस्यांगुलिभेदे वृद्ध्याहन्याद्विचक्षणः ॥ ११ ॥
आयुष्यऋक्षवाराष्ट्योन्यंशेषु शुभं वदेत् ॥ १२ ॥
आयव्ययभवेन्नित्यं धनं निर्धनमेवच ॥ १३ ॥
वेरायामं गजब्रह्मवृद्ध्यार्कदशभि र्भवेत् ॥ १४ ॥
आयाधिक्ये व्यये क्षीणे मानतस्तं पदः पदम् ।
धनहीने ऋणाधिक्ये वेरं तत् सर्वदोषकम् ॥ १५ ॥
कृत्वा नवगुणं वेरं सप्तभि र्हरते तथा ।
शिष्टसूर्य्यादिवारं तु क्रुरवर्ज्यं शुभं नयेत् ॥ १६ ॥
वेरोन्नतिं त्रिवृद्धयाष्ठहतं शेषं तु योनयः ।
योनिष्वष्ट स्वयुग्मास्तु प्रशस्ता नेतरा शुभाः ॥ १७ ॥
उत्सेधे त्रियुगाद्वृद्धे सप्तविंशतितो हरेत् ।
शेषमास्ययुगाद्यं तु नक्षत्रं तत् चतुर्गुणे ।
हृते तु नन्दिभि शेषमुदितं तस्करादिभिः ॥ १८ ॥
तस्करोभुक्तिसौख्ये च धनी नरपतिस्तथा ।
अभयंच दरिद्रंच समृद्धि र्निन्दितं तथा ॥ १६ ॥
नवैतेह्यं शकास्तत्र कीर्त्तिता सुधर्यथाक्रमम् ।
श्रेष्ठा षडंशा दारिद्र्यं तस्करं निन्दितं त्यजेत् ॥ २० ॥

ग्रामादीनां च कर्तॄणां हीनमृक्षं च निन्दितम् ॥ २१ ॥
आयाधिके तु षट्वर्गं गृह्णीयाद्यच्छुभावहम् ।
तस्मात्सर्वप्रयत्नेन आयादि सम्पदः पदम् ॥ २२ ॥
वेरनक्षत्रमारभ्य कर्तृतारावसानकम् ।
गणयित्वा हरेद्रंध्रै शिष्टं चेत् त्रिकपंचकम् ।
सप्तकं निन्दितं प्राहुः स्तयसंख्या शुभावहः ॥ २३ ॥
गणं चेत् स्युः रमानुष्यं शुभं राक्षसमानुषम् ।
देवराक्षसमित्येतद्वयं चेन्निन्दितं भवेत् ॥ २४ ॥

तृतीयोऽध्यायः

प्रतिमास्वरूपाविधानम् ।

तेजोऽष्टनन्दि वसुनन्दि चतुर्विवृद्ध्या ।
हत्याष्टभै मुनिदिनेशग्रहेशै ।
शिष्टं हि योनि रुडुवारधनार्णमंशम् ।
नोयुग्ममुग्रधनलाघवतस्कराद्यम् ॥ १॥
समव्याससमुत्सेधौ विदध्याद्वामदक्षिणौ ।
व्यासोत्सेधागुंलमिति ज्ञात्वा कुर्य्यात् यथाविधि ॥ २ ॥
प्रतिमा निम्नवदना यदि शिल्पी विनश्यति ।
चिरं न पूज्यते भर्त्तु विभवं नश्यति ध्रुवम् ॥ ३ ॥
नासात्रियवमानाद्प्यधिका यदि कल्प्यते ।
शीघ्रमेवहि राजानं निहन्तीति विनिश्चितम् ॥ ४ ॥
नासांगुलद्वयामिता सुपुढा सुमनोहरा ।
निर्म्मिता चेत् समधिका शिल्पिनो धनधान्यहृत् ॥ ५ ॥
नासाहैन्ये श्रियं हन्ति दुःखं हैन्ये कपोलयोः ।
उग्रदृक् प्रतिमा शीघ्रं निहनिष्यति नायकम् ।
पुत्रहानिं प्रकुरुते शोकं चाप्यधिकं तथा ।
मारीवनाशयेत् सर्वाः प्रजाः कालविपर्य्यये ॥ ६ ॥
ऊर्ध्वदृष्टितु रौद्री च राज्ञो राष्ट्रं विनश्यति ।
अधोदृष्टि स रौद्री च अर्चकं निहनिष्यति ।

यदि नासाग्रदृष्टि स्यात् शिल्पाचार्य्यं विनश्यति ।
पार्श्वदृक् बन्धुनाशाय समदृष्टिस्तु कारयेत् ।
समदृष्टि स्तु शान्ता च सर्वजीवसुखा भवेत् ॥ ७ ॥
महानागस्त्वधोदृष्टि ह्यूर्ध्वदृंमकरस्तथा ।
समदृष्टिस्तु देवानां पार्श्वदृष्टिस्तु भामिनी ॥ ८ ॥
नासापुटसमुत्सेधौ कपोलौ चेन्न कल्पितौ ।
पार्श्वयुग्मंच हीनं स्यात् तत् वेरं दुःखदं नृणाम् ॥ ९ ॥
नासिकास्यादतिस्थूलं शिल्पिनां हन्ति सम्पदम् ।
कपोलौ चेदतिस्थूलौ महोपद्रवकारकौ ।
पार्श्वस्थौल्ये प्राणहानिः कक्षस्थौल्येऽपि शिल्पिहा ॥ १० ॥
कंबुनासदृशग्रीवा सुवर्णकलसस्तनी ।
सुकेश्यंबुधिकन्येव नारी सर्वशुभावहा ॥ ११ ॥
करमानेन सदृशं चरणं परिकल्पयेत् ।
सर्वसम्पत्करं प्राहुः शिल्पशास्त्रविचक्षणाः ॥ १२ ॥
हस्तांगुल्यः कृता ह्रस्वाः पादांगुल्यः कृशा यदि ।
राजानं पीडयेत् विम्वं शयनासनचंक्रमैः ।
समालोच्य ततः कुर्य्यात् प्रतिमां शिल्पिकोत्तमः ॥ १३ ॥
समुत्सेधस्य सदृशं नितम्बं चेत् विनिर्मितम् ।
निरतं वर्धते भाग्यं पूज्यते वहुवत्सरान् ॥ १४ ॥
गुणदोषौ च विज्ञाय शिल्पी कुर्वीत बुद्धिमान् ।
अन्यथा यदि कुर्वीत कर्त्ता भर्त्ता विनश्यति ॥ १५ ॥
अशेषभूतोद्भवकर्मकर्त्ता सुरासुराणां च गुरुस्तथैव ।
विश्वस्य सृष्टिस्थितिनाशहेतुः श्रीविश्वकर्माखिलदेवमुख्यः ॥
लोहपाषाणकाष्ठानां मृन्मयानां च शर्करा ।
सुधानां चित्रकानां च बहुदक्षो विनिर्मिता ।
सूत्रशास्त्रक्रियायज्ञमन्त्रतन्त्रार्थकोविदः ।
संकल्पसूक्तपठनं मार्जनं चाघमर्षणम् ।
स्नानं सन्ध्याजपोहोमस्वाध्यायो ब्रह्मतर्पणम् ॥
विश्वकर्मकुलाचारः पूर्वाचारविधिक्रमः ॥ १७ ॥

अन्यजात्या न कर्त्तव्यं कर्त्तु भर्त्तुः कुलक्षयम् ।
कुण्डको गोलकश्चैव नटकश्चर्मकारकः ।
परमूर्त्तिप्रवेशेन कर्त्ता भर्त्ता विनश्यति ॥ १८ ॥
आदिमूर्त्ति स्वयं शिल्पी न भेदं शृणु पार्वती ।
त्रिसन्ध्यावन्दनाच्चैव गायत्री वेदपाठनात् ।
तज्जिह्वा वेदसम्पन्ना तत् कर्मदीक्षया गुरुः ।
शिल्पिनो हृदयं ब्रह्मा चन्द्रसूर्य्यो च चक्षुषि ।
हस्तौ हरिहरौ चैव सर्वांगं सर्वदेवता ।
मणिवन्धद्वयं चैव गणेशषंमुखस्तथा ।
करयो सर्वतीर्थानि गंगायमुनासरस्वती ॥ १६ ॥
दृष्टिनिर्माणकाले च प्राणसंस्थापनेऽपि च ।
मन्त्रतन्त्रप्रभावज्ञः कारयेच्छिल्पिकोत्तमः ।
स्थूणिकास्थापनं चैवमाचार्य्यो वैश्वकर्मणः ।
यजमानी विश्वकर्मा च आदिब्रह्मकुलोद्भवः ॥ २० ॥
पूर्वं शिल्पी प्रतिष्ठाप्य द्वितीया ब्राह्मणै कृता ।
अन्यथा कीर्त्तितं तत्तुरूपं निर्जीवमेवहि ॥ २१ ॥
जलधान्याधिवासं च शिल्पाचार्येण कारयेत् ।
अन्यजात्या न कर्त्तव्यं कर्त्ता भर्त्ता विनश्यति ॥ २२ ॥
शिल्पी माता शिला पुत्रो दासत्वं सर्वपूजकाः ।
कर्त्तव्य इन्द्रभोगश्चेदिदं त्रिविधलक्षणम् ॥ २३ ॥
मातामहं पिताशिल्पी पुत्रांश्च सर्वदेवताः ।
सर्वेषां त्वष्टृपुत्राणां दीक्षामोक्षकरो गुरुः ॥ २४ ॥
नेत्रोन्मीलनपात्रं च वस्त्रं स्वर्णशलाकिके ।
कुंभं धान्यं च धेनुश्च शिल्प्याधीनमिति स्मृतम् ॥ २५ ॥
शिल्पीपूजा शिलापूजा शिल्पीदुःखेन दुःखिता ।
शिल्पिना कल्पितं दैवं शिल्पिब्रह्ममयं जगत् ॥ २६ ॥
शिल्पिणं पूजयेत् पूर्वं तस्य लक्षणमुच्यते ।
धेनुर्गजतुरंगाश्च पल्लक्यां दौड़िकं तथा ।
कन्याः क्षेत्राणि ग्रामाश्च छत्रचामरसंयुतम् ।

समस्ताभरणं श्चापि शिल्पिनां तृप्तिभोजनम् ।
एतेषां सम्प्रदायेन कर्त्तव्यं शिल्पिपूजनम् ।
शिल्पिनो मानसे तुष्टे दैवसन्तुष्टे रेवच ।
सर्वसम्पत्तिसंपूर्णं राजाराष्ट्रं च वर्धते ॥ २७ ॥
शिल्पिना क्रियमानेन यदपूर्णाकृति भवेत् ।
श्रेयस्कामी न तद्विम्बं पश्येद् भ्रष्टं तदन्यथा ॥ २८ ॥
बुद्बुदं पंचरात्रं तु पवनसप्तरात्रकम् ।
दशरात्रेण पिण्डं स्यात् पक्षे चैवाण्डरूपकम् ।
मासे शिरसि उत्पत्तिः द्विमासे पक्षमुद्भवेत् ।
त्रिमासे चैव सर्वांगं चतुर्मासे नखानि च ।
लोमानि पंचमासेन षन्मासे चास्थिबन्धनम् ।
प्राणप्रवेशसप्तम्यामष्टमे ज्ञानचिन्तनम् ।
पूर्वजन्मकृतं प्राणी जन्मानि स्मरति क्रमात् ॥ २९ ॥
समर्थ शिल्पिनां पूज्यः ययौदृष्टिपथे क्रमात् ।
कुंभं धेनुं च कन्याश्च सर्वाभरणभूषिताः ।
धान्यं द्वीपान् द्विजक्षत्रवैश्यशूद्रजघन्यजुन् ॥ ३० ॥
शिल्पी नमस्क्रिया पूर्वं देवरूपधरो यतः ।
पश्चात् ब्राह्मणो राजानो वैश्य शूद्रा इति क्रमात् ॥ ३१ ॥

चतुर्थोऽध्यायः ।

गोपुरप्रकारादिनिर्णयम् ।

गोपुरं सप्तधामानं वक्ष्ये संक्षेपतः क्रमात् ॥ १ ॥
सप्ताष्टहस्तमारभ्य द्विहस्तविवर्धनात् ।
विस्तारं द्विगुणोत्सेधं गोपुराणं तमुत्तमम् ॥ २ ॥
एकादिसप्तपर्य्यन्तं भागमानेन वक्ष्यते ॥ ३ ॥
त्रयोदशां शविस्तारं द्विभागं कूटविस्तरम् ।
पंचभागं तु शालायां शेषस्यान्तरपञ्जरम् ॥ ४ ॥
गोपुरस्य तु विस्तारं पंचभागं विधीयते ।

द्विभागं भित्तिसंयुक्तं त्रिभागं गर्भगेहकम् ॥ ५ ॥
सन्निधिद्वारमध्यस्य समाद्वारं हरिष्यते ।
सन्निधिद्वारहीनं स्यान्मण्ढपद्वारगोपुरम् ।
अथवा तद्विहीनं स्यात् प्राकारं मध्यमं भवेत् ॥ ६ ॥
द्वारशोभा द्वारपाला द्वारप्रासादहर्म्यधि ।
गोपुरार्धं तु चत्वारि द्वारशोभा तु पंचमम् ॥ ७ ॥
द्वारद्विभागमाधिक्यमायतं चतुरस्रकम् ॥ ८ ॥
उत्तरान्तसमुत्सेधं तदर्धं द्वारविस्तृतम् ।
विस्तारद्विगुणोत्सेधमेतत् द्वारस्य लक्षणम् ॥ ९ ॥
त्रिभागाख्यं तमायामं मध्यभागानि विस्तृतम् ॥ १० ॥
अधिष्ठानसमुत्सेधं वेदिकायान्तमिष्येते ।

मयशास्त्रं संपूर्णम् ॥
